श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ सौन्दर्यस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सौन्दर्यस्तबकः ॥

वन्दे सौन्दर्यपर्याप्तिभूमिं कामपि देवताम्।
अब्जं सहोदरं यस्याः शंसन्त्यब्जशरं सुतम्॥ १ ॥

अद्वैतमक्षिभिरह श्रवसां यदि स्यात्
द्वैतं पृथग्यदि पुना रसनासु च स्यात्।
ईशीय वर्णयितुमर्णवराजकन्ये
तत्तादृशं किल तवावयवाभिरूप्यम्॥ २ ॥

मौलौ त्वयाऽपि विधृतो मधुपौघ मैत्रीं
चित्रं करोति कमले चिकुरप्रपञ्चः।
माने कृतेऽपि भजते मलिनैकसख्यं
प्रायेण देवि कुटिलप्रकृतिः स्वभावः॥ ३ ॥

न त्वं दधासि नवचम्पकमाल्यमम्ब
कर्तुं निसर्गसुरभौ कबरे सुगन्धम्।
किं तर्हि कुन्तळपरीमळसारलाभ-
लोभभ्रमद् भ्रमरलोकनिवारणाय॥ ४ ॥

रुचं रचयितुं कचे रुचिरपुष्पवर्गैः समं
सदा वहसि भूषणं सह सुधांशुना पूषणम्।
उभावभवतामतो जननि पुष्पवन्ताविमौ
तयोर्घटनयोत्तमश्रियमुपैषि तत्रार्थिकीम्॥ ५ ॥

सुमनोवरवासवासना-
ध्युषिताः कृष्णघनाप्तिशालिनः।
वरदे विजयन्ति कुन्तळा
भवदीयाः सकलापभृज्जयाः॥ ६ ॥

www.prapatti.com

जलभृद्रुचिभाजि सिन्धुकन्ये
शिखिषु द्वेषमुपेयुषि प्रकामम्।
तमसाकलिते तवोपपन्नः
कुटिले कुन्तळमण्डलेऽहिबन्धः॥ ७॥

अलकाकृतिरग्र्यपुष्पकान्ता
प्रबलश्रीदतया तव प्रसिद्धा।
वरनीलरुचोज्ज्वला मुरारेः
वनिते भाति मुकुन्दलालितश्रीः॥ ८॥

भुवनोत्तरसिन्धुभूषितो
घनशैवालकवत् कचो ध्रुवम्।
सुरुचा महितो हिमालयो-
दितयोद्भासितमीनलञ्छनः॥ ९॥

हन्त लक्ष्मि तव कुन्तलव्रजं
चामरं वदति पामरोऽपि कः।
प्राक्तनस्तु हरिणोपलालितः
पश्चिमं यदपुरस्कृतं मृगैः॥ १०॥

सिन्दूरकान्तां जगदम्ब मल्ली-
सराभिरामां चिकुरावलिं ते।
मन्यामहे देवि कलिन्दकन्यां
गङ्गासरस्वत्युदितानुषङ्गाम्॥ ११॥

सुतरामलकव्रजः प्रसूना-
न्यलमम्लानिविशोभितानि बिभ्रत्।
सुरभिस्फुरितः सुपुत्रि धात्र्याः
सुमहारामविभूषितो विभाति॥ १२॥

आपीडयन्ति कुसुमेषुशरा निकामम्
आत्मानमित्यखिलधात्रि रुषेव देवः।

आपीडयत्यनुदिनं तव कुन्तलात्म-
न्यन्धे तमस्यहह सूनकुलं मुकुन्दः॥ १३॥

बध्नासि हन्त सुरभौ सुमनोभिरम्ब
साकं हरेरपि मनस्तव केशपाशे।
आमोदमग्र्यमत एव तदेत्यनन्तं
किं न क्षमं गुणवदाश्रयणं गुणाय॥ १४॥

त्रैलोक्यमातरजहत्तरुशाखमेव
दृष्टं कुलं सुमनसां फलवद्धि लोके।
अप्याहृतं बहिरहो सफलं प्रसूनं
काल्पद्रुमं तु भवतीकचमण्डनेन॥ १५॥

सुरैर्दिव्यैराम्रेडितसहजसौरभ्यसुभगं
कचं ते कल्याणि भ्रमति परितो भृङ्गनिचयः।
ध्रुवं तत्सारूप्यं स्वयमभिलषन् झङ्कृतिमिषात्
स्तुवन् प्रादक्षिण्यक्रममखिलमातः कलयति॥ १६॥

प्रभोर्नाभीपद्मं भ्रमरततिरुत्सृज्य पतति
स्थिरामोदालम्बे चिकुरनिकुरम्बे जननि ते।
मनागब्धेः कन्ये मधुरिपुसमीपे परिचयो
न रोचेत प्रायो ननु मधुपवर्गस्य मनसे॥ १७॥

क्षममिदं कलशोदधिकन्यके
तव कचस्थिरसौरभलोभतः।
विकचसूनविशेषपरीमळं
जहदिह व्रजति भ्रमरव्रजः॥ १८॥

निहितास्तव कुन्तलान्धकारे
निबिडे मारजनि स्थिरप्रकर्षे।
कलयन्ति नवस्रजो विचित्रं
कमले कामपि सौरभानुवृत्तिम्॥ १९॥

कुन्तळो नियमितोऽपि भवत्याः
　चञ्चलो भवति तामसरुच्या।
न्यक्करोति परिशोभितमालो-
　त्कर्षमम्ब परिपुष्यति चैनम्॥ २० ॥

कञ्जालये कमपि तावकफालभागं
　सञ्जातशोभमलकावलिमेलनेन।
उत्प्रेक्षते भुवि न कस्तरुणेन्दुमब्धेः
　उत्थानकालभवशैवलभारयोगम्॥ २१ ॥

चिरं ते वक्त्रेण श्रितचिकुरवर्गेण कमले
　तुलां चेदारोढुं तुहिनकिरणोऽयं स्पृहयते।
तदा गाढं सख्यं तिमिरनिकरैर्विन्दतु जवात्
　अवाप्नोतु प्रावृड्जलमुगविनाभावमपि वा॥ २२ ॥

पुरुषनयनयुग्मं पुष्पवन्तात्मकं ते
　सह निवसति हर्षात् सन्ततं वक्त्रबिम्बे।
तदिह जलधिकन्ये तन्महादर्शलीलां
　भजत इति कवीनां भारती सूनृतैव॥ २३ ॥

आदर्शे प्रतिबिम्बमात्रकलनादारोप्य मुग्धा जनाः
　मातस्त्वन्मुखकान्ति चौर्यमनघे मथ्नन्ति तं पाणिभिः।
हा सङ्क्रामति साधु तन्मलिनिमा हस्तेषु तेषां स्वयं
　दद्यान्नूनमनेनसां हि कलुषं मिथ्याभिशंसञ्जनः॥ २४ ॥

विकचस्य कचोज्ज्वलेन पद्मे
　विकलङ्केन कथं नु पङ्कभाजः।
सरसेनगतस्य नीरसत्त्वं
　जलजातस्य भवन्मुखेन सख्यम्॥ २५ ॥

विजिते ननु ते मुखेन राज-
　न्यपि दुर्गेश्वरमौलिपूज्यपादे।



www.prapatti.com

वनवासितया तपस्स्पृहाणां
    विजये को विशयः कुशेशयानाम्॥ २६ ॥

नदवनजमहो महातपश्री-
    कृतरुचि ते मुखजन्म लिप्समानम्।
अपि यदि तदधःशिरस्तपस्येत्
    जनवदनं कमले भवेत्तथापि॥ २७ ॥

तदब्जमब्जश्च तवाननद्विषौ
    मुरारिपत्नि व्रजतः पराभवम्।
द्विषा सहैकेन मिथो विरोधिनोः
    न योद्धुमस्ति प्रभुता द्वयोरपि॥ २८ ॥

त्वदास्यवसुतस्करं ध्रुवमवैमि जैवातृकं
    पयोजनिलये यतः पिहितमन्दिरायां त्वयि।
असौ निशि विजृम्भते पुनरपावृते धाम्नि ते
    पराचलवने रवेर्घृणिषु वा दिवा लीयते॥ २९ ॥

जन्ममन्दिरमशोकसम्पदः
    सालकान्तमुरुकान्तिकन्दळम्।
आननं मदनकेळिकाननं
    मन्यते जननि माधवस्तव॥ ३० ॥

स्वरूपतस्त्वद्वदनात्मना तथा
    द्विधा सुधांशुर्जलधावजायत।
तदेष राजा द्विजराज इत्यदः
    पदं दधात्यर्थवदच्युतप्रिये॥ ३१ ॥

मातः सरोजसदने वदने त्वदीये
    संफुल्लमुत्पलमिवाच्छसरोविशेषे।
चन्द्रे कलङ्क इव भृङ्ग इवारविन्दे
    मन्देतरद्युतिरसौ तिलकः समिन्धे॥ ३२ ॥



www.prapatti.com

उपाश्रितानवयवमुद्गतश्रियं
प्रियङ्गुणादिकमणुमध्यमा शुभम्।
त्वमेयुषी वरतिलकानना रमे
सुधान्यभूरुचिरसुधा धराऽप्यसि॥ ३३॥

नलिनशशिनौ सिन्धोः कन्ये सरोगनभोगता-
त्यजनकुतुकादेतौ जातौ त्वदक्षिमुखात्मना।
सह निवसतः सेतूकृत्य भ्रुवोर्युगमन्तरे
सहजरिपुताभाजोर्जन्मान्तरेऽपि न सङ्गतिः॥ ३४॥

नयनयुगळाक्रान्तं कर्णान्तयुग्ममधोक्षज-
प्रणयिनि तव स्रष्टा दृष्ट्वा भयाकुलमानसः।
अहह मुखमप्याभ्यां मा क्राम्यशेषमिति न्यधात्
किमुपरि तयोर्धीमान् सीमाविभागशिले भ्रुवौ॥ ३५॥

यत्किङ्कराः सरसिजासनशङ्कराद्याः
देवाः स एष दनुजारिरपि भ्रुवोस्ते।
जागर्ति किङ्करतया जगदम्ब नित्यं
छन्दानुवर्तनकृतः कुटिलस्य सर्वे॥ ३६॥

श्रुत्यन्तजुष्टममलोत्तमकान्तियोगात्
अत्यन्तसुन्दरमनङ्गजनेर्निदानम्।
उद्भासितामरसभामहितं मदम्ब
को न स्तुवीत नयनं तव कृष्णरूपम्॥ ३७॥

दुग्धाम्भोधिसुते त्वदक्षिविजितो राजानमेणो गतः
त्यक्त्वासावपि मण्डलं मुखजितो दुर्गेशमेणाश्रयः।
स त्वेकं करतः परं च शिरसा धृत्वा दृगास्यद्विषोः
दुर्गेशः स्वयमीश्वरोऽप्यटति खल्वद्यापि भिक्षामहो॥ ३८॥

नयनं तव देवि वर्णरीतेः
विपरीतेऽपि विपर्ययं न याति।

www.prapatti.com

कमलं तु समेति कञ्जगेहे
कथमाहुः समतां तयोः कवीन्द्राः॥ ३९ ॥

निशायामम्ब त्वन्नयनसुषमामोषकमिति
क्रुधा नूनं राज्ञा कुवलयमिहाकारि विकचम्।
चकोरास्तच्चोराः चकितमनसः प्रेक्ष्य तदिदं
सुतप्तास्तत्पादं ग्रहणमभितन्वत्यशरणाः॥ ४० ॥

अमर्षाल्लोकाम्ब स्ववसुहरनीलोत्पलभृतोः
अपि श्रुत्योः सीमां कबलयति ते नेत्रयुगलम्।
कृतः कल्पेष्वार्तिं न परमपराधः फलति तत्
विपक्षाणां पक्षीकृतिरपि विषादाय भवति॥ ४१ ॥

चक्षुः प्रमाणेन समुद्रकन्ये
सीमा श्रुतेः सङ्कुचिता तवाभूत्।
न तत्र कैमुत्यनयात् कथञ्चित्
उन्मेषमृच्छत्युपमानवार्ता॥ ४२ ॥

त्रैलोक्य सन्त्रायिणि तावकीनो
ध्रुवं कटाक्षो धृतराष्ट्रजातः।
कल्याणि कर्णप्रणयी कथं वा
पुष्णाति कृष्णार्जुनदीप्तियोगम्॥ ४३ ॥

आकर्णदेशादुदितप्रकर्षं
तवाक्षि मन्येऽतनुबाणरूपम्।
यत्कङ्कटं वेङ्कटनायकस्य
धैर्यात्मकं कृन्तति सिन्धुकन्ये॥ ४४ ॥

गुप्ता वनेषु विहरन्ति सुहृद्यमीनाः
कस्यापि नो कुवलयेषु दिवा प्रकाशः।
राज्ञो बिभेति जगदम्ब कुशेशयालिः
कर्णेजपे जयति नेत्रयुगे भवत्याः॥ ४५ ॥

आस्वादने कृतरसावधरामृतस्य
    मातस्त्वदक्षिमधुपौ बत मार्गमध्ये।
नासाख्यचम्पकमवेक्ष्य निवृत्तयत्नौ
    दृष्टेप्सिताग्रहणतस्तरलौ सदा स्तः॥ ४६ ॥

जातोन्मेषौ मुखरुचिसुधा सागरे तावकीनौ
    नेत्रात्मानौ जननि भुवनोज्जीवनौ दिव्यमीनौ।
न्यूनाकारान् भगवति निजापेक्षया राक्षसारेः
    चक्षुर्मीनान् कबलयत इत्येष जातिस्वभावः॥ ४७ ॥

सौवर्णं ते सिन्धुकन्ये निरुन्ध्यात्
    आतङ्कं नः कर्णताटङ्कयुग्मम्।
नृत्यन्तीनां यत्र नेत्रद्युतीनां
    जालं नीलग्रावभावं बिभर्ति॥ ४८ ॥

पूषा कर्णे स्वर्णताटङ्कभूषा-
    वेषादिन्धे पुत्रनामादरेण।
तत्सामीप्यादेव देवि प्रसादं
    नित्यं धत्ते नेत्रपङ्केरुहं ते॥ ४९ ॥

त्रैलोक्याम्ब त्वद्वतंसोत्पलान्ते
    गुञ्जं गुञ्जं सञ्चरन् चञ्चरीकः।
किं व्याचष्टे कान्तसन्देशहारी
    कर्णाभ्यर्णे काममन्त्रार्थतत्त्वम्॥ ५० ॥

काचिद्भाति वतंसकोत्पलमयी कल्याणताटङ्कसत्-
    प्राकाराश्रितकर्णधिष्ण्यनिहिता प्रायः शतघ्नी रमे।
तद्रत्नाग्निरुचाऽरुणः स्मृतिभुवा तस्या मुखात् प्रेर्यते
    लोलम्बायसगोळकः प्रणयिनो दुर्मानवर्मार्दनः॥ ५१ ॥

कंसारातेश्चाटुमाध्वीझरैस्ते
    कर्णौ पूर्णावर्णवेन्द्रस्य कन्ये।



www.prapatti.com

जानन्तस्तत्सन्निधौ चञ्चरीकाः
चञ्चूर्यन्ते नोत्पलं तत्र हेतुः॥ ५२॥

ग्रस्तवतंस कुवलयं
दृग्युगमुपकूजदलिरवमिषात् ते।
मद्वसुचोर इहेति प्रवदति
किल कर्णपत्रमित्राय॥ ५३॥

इमामवामां श्रुतिमिन्दिरे तव
स्तुवन्ति सन्तः स्मृतिजन्मकारणम्।
शिरस्यमुष्याः सुमनोभिरञ्चिते
चकास्ति दृष्टिर्जगतामधीशितुः॥ ५४॥

तव द्वितीया श्रुतिरुच्चकैरसा-
वनङ्गभावानुगुणा गुणाम्बुधे।
वशे निधायैनमशेषशेषिणं
करोति मातस्तव कर्मकारकम्॥ ५५॥

दीव्यत्कर्णसुवर्ण कुण्डलमये दीप्ताग्निकुण्डे ज्वलत्
रत्नाङ्गारघने हरेर्धृतिमयीं हुत्वाऽऽहुतिं तावके।
भृङ्गाध्वर्युरनङ्गदीक्षितवृतो झङ्कारमन्त्रान् जपन्
वाराशेर्दुहितः प्रदक्षिणविधिं वारान् विधत्ते बहून्॥ ५६॥

देवानां मधुरं स्वतः स्तुतिवचो देवि स्वतो सुन्दरं
मादृग्बालकजल्पितं च जगतीमातः श्रुती याति ते।
तत्राद्यं तदवस्थमेव चरमं तत्तुल्यतां गाहते
मुक्तं शुक्तिषु मौक्तिकं घनपयो मुक्ता तु नैवान्यथा॥ ५७॥

स्फुरन्मुक्ताकान्तिस्फुरसलिलमग्र्यारुणमणि-
प्रभाकल्हाराढ्यं प्रियनयनमीनैकशरणम्।
हताशेषक्लान्तिं हरिदुपलनीलोत्पलघनं
तटाकं ताटङ्कान्तरमुषसि सेवे तव रमे॥ ५८॥

www.prapatti.com

सुवर्णताटङ्कमुनिः श्रुतौ स्थिरः
प्रपन्नमुक्ताभ्युदयो दयोदधे।
प्रकाशितार्चिः सरणिः प्रिये हरेः
चकास्ति ते चक्रधराभिनन्दितः॥ ५९ ॥

तिलप्रसूनं तुलयत्यसौ जगत्-
सवित्रि नासा तव सारसालये।
तदञ्चलोदञ्चितुषारविप्रुषा
समानतामेति तदग्रमौक्तिकम्॥ ६० ॥

नासा तवासौ नववंशवल्ली
कासारजावासिनि कात्र शङ्का।
प्रलम्बते तत्र यदम्ब मुक्ता-
फलं बतेदं गलितं हि तस्याः॥ ६१ ॥

श्रीरास्यकान्तिजलधौ स विभाति नासा-
सेतुस्तवाद्भुतगतिः कलनेन यस्य।
नाथः समेति न विदेहजयान्वयं हा
लङ्केशपाशकलनादपयात् धैर्यः॥ ६२ ॥

भ्रूसूत्राभ्यामूर्ध्वमाबध्य मिन्वन्
नासावंशस्तम्भमम्भोधिजे ते।
तत्र स्थित्वा ताण्डवं संविधत्ते
चित्रं क्रीडां चित्त भूनाट्यजीवी॥ ६३ ॥

दिव्यं ददाति नवचम्पकमम्ब गन्धं
त्वद्घ्राणजन्मनि तदेव सुधाब्धिकन्ये।
गृह्णाति ते बहुविधं कृतिनो ददाना
जन्मान्तरे समधिकं विभवं लभन्ते॥ ६४ ॥

मदनजननि नासामौक्तिकं वेद्मि मल्ली-
मुकुळमिति सुगन्धिश्वासमन्दानिलेन।



www.prapatti.com

तदुपरि यदजस्रं तद्विकासप्रतीक्षं
दृगलियुगलमेतद् दृश्यते सावधानम्॥ ६५ ॥

हसितरुचि सितांशुकं वसाना
श्वसितसमीरनटेन नाट्यमाना।
जनयति जननि त्वदीयनासा-
मणिगणिका मधुसूदनस्य मोदम्॥ ६६ ॥

मुखविधुमधुरा धरोष्ठसन्ध्या-
परिसरसीम्नि हरिप्रिये भवत्याः।
भजति जननि नासिकाग्रमुक्ता-
फलमिह तारमुदार तारलीलाम्॥ ६७ ॥

स्वरिपुरदभिया विविक्षु नासा-
बिलमिव मौक्तिकमेतदग्रलग्नम्।
सरसिजभवने निजप्रतीप-
श्वसितनिवारितमम्ब कम्पमेति॥ ६८ ॥

भवती स्मितचन्द्रिका रमे
भवतीसुन्दरदन्तरश्मिभिः।
भवतीयमकिञ्चनस्य मे
भवतीव्रातपखेदशान्तये॥ ६९ ॥

हसितं भवदीयमाद्यवर्णं
जहदेतज्जननि स्वरूपगत्या।
विदधे विधुपादजातमैत्री-
मतिमन्दस्य किलोचिताधराप्तिः॥ ७० ॥

मनोजमातस्तव मन्दहासं
मन्ये मधुध्वंसन कीर्तिभासम्।
विसृत्वरं त्वद् रसनाग्रवृत्तेः
वाग्देवताया वपुरंशुपूरम्॥ ७१ ॥



www.prapatti.com

नासोरु मौक्तिक घृणिद्विगुणीकृतेन
    हासोदयेन हसता सुषमां हिमांशोः।
हा हन्त सुन्दरि तवाधरबन्धुजीवः
    पद्मे परिस्फुटमटीकत पाटलत्वम्॥ ७२॥

बालेन्दुकान्तिरिव पश्चिमसान्ध्यरागे
    पद्मालये स्फटिकभा इव पद्मरागे।
प्रत्यग्रपुष्पसुषमेव च पल्लवाग्रे
    भाति स्मितद्युतिरसावधरे भवत्याः॥ ७३॥

स्वाद्वी सुधा स्मितमिषेण सुधाब्धिकन्ये
    प्रत्यक्षतस्त्वदधरे परिदृश्यतेऽसौ।
सिक्ता यया तव सदा स्वदते चटूक्तिः
    मातः शुभाय मनसे मधुवैरिणोऽपि॥ ७४॥

मृद्वीकेयं न खलु भजते मृद्विकाराद्विशेषं
    मन्ये पूरं मलिनमलिनामाकरं माकरन्दम्।
मातर्नैवाकलयति सिता माधुरी साधुरीतिं
    हन्ताहन्तां तव सुवचने भाति मोचा मुमोच॥ ७५॥

हृत्वा वाचां रसमसदृशं हन्त पुण्ड्रेक्षवस्ते
    मूढं मध्ये जठरकुहरं पाटवादूढवन्तः।
तं कृच्छ्रात् ते ददति च पुनर्दारिता दारुयन्त्रैः
    मातर्देयं स्वयमददतां मर्दनं मार्दवाय॥ ७६॥

अभ्यातञ्च्य क्षीरधिमिन्दोरमृतौघैः
    आमथ्यैनं देवि मथा चेक्षुमयेन।
तस्माद्देवैर्यद्युपनीतं नवनीतं
    तिक्तीकुर्यादुक्तिरियं ते तदपि श्रीः॥ ७७॥

मातः समस्तजगतामसि माधवी त्वं
    मन्ये तवाधरदलं मृदुलं प्रवालम्।

दन्तावलिं सुमनसां ततिमुल्लिखामि
    स्वादूनि वेद्मि च मधूनि सुभाषितानि॥ ७८ ॥

मातर्भवन्मुखमयूखसुधाब्धिमध्ये
    बिम्बाधरामृतमभूद्वचनामृतं च।
आद्यं तयोः पिबति सादरमाननेन
    श्रोत्रद्वयेन चरमं परमः पुमान् सः॥ ७९ ॥

परिहृतभवशब्दा भारती तावकीना
    परिहसतु निकामं कालकण्ठाभिलापम्।
श्रुतिपथमधुरेयं सिन्धुकन्ये कथं वा
    शुकमुख फणितीनां दोषमाविष्करोति॥ ८० ॥

असङ्कोचां मोचा मधुरिममदोन्मोचनविधौ
    अनीचां ते वाचामहरहरहं नौमि लहरीम्।
उदूहे यां श्रोतुं कुतुकमुदधेः पुत्रि दधती
    श्रुतीभावं चक्षुःश्रुतिपतिदृशां विंशतिशती॥ ८१ ॥

पर्यायः शर्करायाः प्रतिकृतिरमृतस्रोतसां तादृशानां
    साक्षी गोक्षीरभूम्नां सुरतरु सुमनो माक्षिकाणां विकारः।
पुण्ड्रेक्षूणां प्रणाली परिणतिरतुला नालिकेरोदकानां
    सोऽयं नालीकगेहे जयति तव वचः संपदां संप्रदायः॥ ८२ ॥

सुता सुधाब्धेः सहजा हिमांशोः
    मातः प्रिया त्वं मधुराधिपस्य।
तथाविधायास्तव के नु वीचीं
    आचान्तमोचां न वदन्ति वाचाम्॥ ८३ ॥

द्राक्षालिरादौ किल रूपयुक्ता
    मध्येऽधिकेक्षुप्रभवा सिता च।
हास्या सुधाप्यग्रजनाभियुक्ता
    स्वादौ रमे जाग्रति वाग्रसे ते॥ ८४ ॥

www.prapatti.com

निःसार वंशजठरे न्यविशन्त हन्त
दन्तद्युति प्रतिभटास्तव मौक्तिकौघाः।
मातर्द्विजव्रज विरोधितया स्थितानां
मातङ्ग मौलिकलनाऽप्युचितैव तेषाम्॥ ८५॥

रमे रसज्ञाञ्चलशारदाया
रदावली ते रमणीय रूपा।
मधुप्रतिक्षेपि मनोऽनुकूले
मन्दारमालेव शुभा विभाति॥ ८६॥

प्रकाशते सज्जघनागमे त्वयि
प्रगल्भशोभोदयिनी रदावलिः।
रमे मुकुन्देन किलामुना धृता
द्युतिर्यदीया सहसोन्मिषन्मुदा॥ ८७॥

आप्तीकृतानाममुकेन हार्दान्
सदा मुकुन्देन सदादृतानाम्।
शुचिद्विजानां ननु तावकानां
मुक्ताकृतिर्विश्वसवित्रि युक्ता॥ ८८॥

हन्तारस्तमसां दिशन्तु कमले दन्ता मुदं तावकाः
येषूद्दामजपासपक्ष रसनाच्छायोपरक्तांशुषु।
उच्चैः पक्त्रिम दाडिम भ्रमवशादुत्पित्सुकेली शुक-
प्रत्यावर्तन खेद निःसहतया पाणिर्विशेषारुणः॥ ८९॥

कन्ये सिन्धोः काऽपि मृद्वी सुहृद्यां
दद्याद्विद्यां त्वद्रसज्ञा मनोज्ञा।
यत्र व्यक्तो रक्तिमा वक्ति मातः
वाचां देव्या नित्यनृत्ताभिघातम्॥ ९०॥

प्रह्वा जिह्वां तव तु शरणीकुर्महे शर्महेतुं
रागादागांस्युपचितवतो रक्षितुं या रमे नः।

वारं वारं वृषगिरिपतेः कोपलोपानुरूपाः
    सूक्तीरुक्त्वा नियतमयते शोणिमानं श्रमेण॥ ९१ ॥

कंसद्विषो महिषि कानन चन्द्रिकेति
    दोषं विहाय रसनामवनात्मिकां ते।
प्राप्ताऽपि पद्मजवधूर्वनजौकसस्ते
    सङ्गादिवाधिकवनस्थितिमेति भूयः॥ ९२ ॥

अभ्यर्चतामनघ वाङ्मयसारदाया
    रूपं रुचा तुलित शारदनीरदायाः।
वन्दीभवत्प्रथित तुम्बुरुनारदायाः
    वन्दे तवाम्ब रसनाञ्चलशारदायाः॥ ९३ ॥

मुकुन्दकान्ते मुखपद्मकान्तेः
    तवाधरोऽयं तरुणातपो वा।
आनन्दकल्यावसरे मुरारेः
    आविर्भवत् प्रागरुणोदयो वा॥ ९४ ॥

बिम्बोष्ठयोः पृथगवस्थितयोः कदाचित्
    सन्धौ कृते जननि साधुपदे निविष्टैः।
ओष्ठस्तवैष वितरन्निजमुख्यवर्णं
    बिम्बाय लुम्पति च तस्य जघन्यवर्णम्॥ ९५ ॥

वैकुण्ठकान्ते वचनाधरौ द्वौ
    वक्त्रे तवास्ताममृतावतारौ।
आद्यो तु वर्णः शुकलालितोऽभूत्
    अन्त्ये पुनः किंशुकलालनीयः॥ ९६ ॥

रागावनेरपि तवाधर जीवकस्य
    राजीववासिनि निराकृतपल्लवस्य।
अच्छैर्द्विजैः परिचयादमृतस्य रीतिं
    आरोहतः समुचितोऽरुणबिम्ब भेदः॥ ९७ ॥



www.prapatti.com

तव रदवसने गुणोत्तरेऽस्मिन्
　　अधरपदस्य विरोधि लक्षणैव।
अमृतकृदपि माधवो मुनीनाम्
　　अमृतमुपैतुममुं निषेवते यत्॥ ९८ ॥

हरिगृहिणि हरिद्रा लिप्तया शम्पया ते
　　तनुमतनुत वेदास्तप्तकार्तस्वराभाम्।
अधरमथ च तत्राप्यम्ब लिम्पन् सुधौघैः
　　अनयदनणिमानं शोणिमानं किमेनम्॥ ९९ ॥

प्रायस्ते जगदम्ब चुम्बनविधौ बिम्बाधरालम्बनं
　　सङ्क्रान्तं मधु नन्दनन्दनमुखे सङ्गीतकाले पुनः।
तस्माद्वेणुमवाप तद्गतरसास्वादी तदादित्सया
　　वंशान् कृष्णपुरन्ध्रि रन्ध्रयति किं तद्वंशजातानलिः॥ १०० ॥

विद्वज्जनै रुचिरविद्रुम पङ्क्तिरेषा
　　विज्ञायतां मदधरादधरा किलेति।
प्रत्यक्षतः प्रकटनाय पयोधिकन्ये
　　कण्ठे बिभर्षि किल विद्रुममालिकां त्वम्॥ १०१ ॥

कपोलौ ते मातः कनकमयताटङ्क सुषमा-
　　झराघातारक्तौ जनजननि यत्रैव निहिताः।
अपि प्रौढेन्द्रद्विट्परिवृढवपुः पाटनखराः
　　समाख्यामन्वर्थां दधति नरसिंहस्य नखराः॥ १०२ ॥

कान्तौ मातः कपोलौ तव यदुपगतां कर्णरत्नांशु पूरं
　　संप्राप्तं चुम्बनेषु प्रियतमवदना दम्ब ताम्बूलरागम्।
मत्वा हस्ताङ्गुलीभिस्त्वमसनरुचिभिर्मार्जनैर्द्विस्त्रिरुक्तं
　　तं दृष्ट्वा दर्पणे ह्रीभरनमितमुखी हास्यते प्रातराल्या॥ १०३ ॥

पाण्डिम्ना हसतेव कैटभरिपुः पाणिस्थशङ्खेन तं
　　पद्मावासिनि पर्यजीहसदसौ स्यालं हि जैवाकृतम्।

हित्वेशं प्रभुरित्यमुं प्रति परीहासाय वक्त्रात्मना
    जातेनैवमधः कृतो हिमरुचा त्वत्कन्धरात्मा दरः॥ १०४॥

अन्तः स्थोष्मोद्धाराद्
    गृहीतमखिलाम्ब कंसदमनेन।
पाञ्चशरजन्यमभितः
    प्रतिगर्जति कन्धरा त्वदीयेयम्॥ १०५॥

चक्राङ्कतामुपगतं स्तनमुन्नतं ते
    वीक्ष्यातितिक्षुरयमुच्छ्रयवांस्ततोऽपि।
कण्ठत्वमेत्य शिरसा निजभुक्तमुक्ता-
    हारं च वाहयति तेन तवाम्ब शङ्खः॥ १०६॥

जनस्त्रिलोकीजननि स्तनौ ते
    कथं पयोजे कथयत्यशेषः।
चतुर्मुखाद्यर्भक जीवनाय
    जातं तयोरेव पयो हि भूयः॥ १०७॥

अमृतकलशव्यूहेष्वात्मोद्भवेषु पयोधिना
    त्वयि कुचमिषाद्वौ निक्षिप्तौ विवर्धयितुं जगत्।
अमृतसहजे यद्दुग्धास्वादनोल्बणपाण्डिम-
    द्रुहिणरसनावासाद्गौरी बभूव सरस्वती॥ १०८॥

न जातुचिद्वर्णविपर्ययं गतौ
    गुणोत्तरौ कन्दुककञ्चुकौ तयोः।
स्वमित्रमाद्यं कुरुते रमेऽन्तिमं
    बिभर्ति मूर्ध्ना त्वदुरोज भूमिभृत्॥ १०९॥

पुरस्त्वदीयाङ्ग पुरप्रवेशे
    पुराणगोपाल भृतावनङ्गः।
उरोरुहक्षीरघटौ च पश्यन्
    उच्चैस्तरां नन्दति सिन्धुकन्ये॥ ११०॥

पुष्पेषु पूजाविधिमाचरिष्यन्
पुण्याहकुम्भाविव पद्मनाभः।
पयोनिधेः पुत्रि महाक्षतैस्ते
पयोधरावम्ब परिष्करोति॥ १११॥

परामिमामुन्नतिमश्नुवाते
स्मराम्ब सद्यः स्तनभूभृतौ ते।
चराचराणामधिपोऽपि चक्री
करार्पणं देवि ययोः करोति॥ ११२॥

हन्त स्तनौ तव विभागकथानभिज्ञौ
कन्दर्पमातरत एव करादिषु त्वम्।
अङ्गान्तरेषु पृथगाभरणं ददाना
हारं द्वयोरपि तयोरपृथग् ददासि॥ ११३॥

मुष्णाति मेदिनिभृतां श्रियमुन्नतानां
सूर्याश्रितं परिहसत्यपि साधुचक्रम्।
ऊर्ध्वं च पश्यति रमे त्वदुरोजयुग्मं
ईदृक् चरित्रमविवेकिनि नैव चित्रम्॥ ११४॥

उच्चैरतन्वाज्यवतीर्णशक्त्योः
भूयांसि पातुं क्षमयोः पयांसि।
मातर्महाहारसमृद्धिभाजोः
युक्तं हि पीनत्व मुरोजयोस्ते॥ ११५॥

विवेकवार्ता विरहेऽपि पद्मे
गुरुत्व भाजोऽस्य कुचद्वयस्य।
गिर्युत्तमा बिभ्रति शिष्यभावं
क्षमाधराणां क्षममेतदेषाम्॥ ११६॥

रमे कराभ्यां रचितार्दनस्य
त्रैलोक्यभिक्षोरतनुप्रदानम्।

स्तनावुदारौ तनुतस्तवेमौ
    तृणीकृताष्टापदशैलशृङ्गौ॥ ११७ ॥

कुचौ हिरण्याचल सम्पदं ते
    प्रह्लादहेतू नियतं भजेते।
तनोति मातस्तत एव नूनं
    नृकेसरी तत्र नखक्षतानि॥ ११८ ॥

उत्तुङ्गयोस्तुल्यमुरोजयोस्ते
    गदन्ति खर्वं कथमम्ब कुम्भम्।
तत्कार्यभूतः कथयत्यगस्त्यः
    तत्र स्वहेतौ परिमाणमेतत्॥ ११९ ॥

रतव्रतारम्भ कृते रतीशो
    हरिद्रया लिप्तमधोक्षजाय।
माता रमे मङ्गलनालिकेर-
    युगं ददौ किं त्वदुरोजयुग्मम्॥ १२० ॥

तवायमम्ब स्तनयोः सखायौ
    दधाति कुम्भौ शिरसेति नूनम्।
ग्राहग्रहात् त्रातुमहो गजेन्द्रं
    त्वरा हरेः क्वापि पुराऽविरासीत्॥ १२१ ॥

उरोजयुग्मं तव युक्तिभूम्ना
    करीन्द्रकुम्भौ कथयन्ति मातः।
आभाति तस्योपरि मौक्तिकश्री
    रोमालिशुण्डा च लसत्युपान्ते॥ १२२ ॥

चन्द्रेण चक्रमिथुनं कृतविप्रयोग-
    त्रासादपेक्षित तदीयजनावलम्बम्।
वक्षोरुहद्वयमिषेण विधुस्वसस्ते
    प्राप्याङ्गमृच्छति निरन्तरसङ्गतिं तत्॥ १२३ ॥



www.prapatti.com

सोढुं कराभिहतिमप्रभवन् वधूनां
    द्राक् कन्दुकः स्तनतयाऽम्ब तवावतीर्णः।
तत्राप्यहो भजति शौरिकरोपमर्दं
    क्षिप्तः सुदृग्भिरयते क्व न मर्दनानि॥ १२४ ॥

नित्योल्लसद्घुसृण धातुनिवेशहृद्यौ
    मातस्तव स्तनगिरी जयतः कठोरौ।
अध्यापितं कठिनतामरविन्दनाभेः
    आलिङ्गनेषु किल येन भुजान्तरालम्॥ १२५ ॥

घटिकाशतकश्रुतोच्छ्रयं
    धनसाहित्यमदः स्तनद्वयम्।
कुरुते कविचक्र निर्जयं
    कमले कान्तगुरुप्रभोदयम्॥ १२६ ॥

सुरतरुचिरलीला शोभितोऽसाविति श्रीः
    पृथुलकुचयुगं त्वं प्रेयसे देवि दत्से।
स तु तदपि गृहीत्वा चापलादम्बरं ते
    हरति परहिरण्यं हर्तुरेष स्वभावः॥ १२७ ॥

उन्नमत्सरमनुन्नमत्सरं
    कन्दुके कलशसिन्धुकन्यके।
पीनतोषितमपीनतोषितं
    भाति ते युगमुरोरुहो रहो॥ १२८ ॥

उदग्रहारं कुचमण्डलं ते
    जनार्दनो देवि जगत्यधीशः।
निपीडयत्येष करग्रहेण
    कारुण्यवार्ता क्व हिरण्यहर्तुः॥ १२९ ॥

मदम्ब भोग्यायतमाल्यजुष्टे
    तव स्तनद्वन्द्व गिरीशमौलौ।

www.prapatti.com

निकाममुद् वृत्ततया निपत्य
    लुठत्यसौ हारसुरस्रवन्ती॥ १३० ॥

पीतस्तनस्ते कमले शिशुत्वे
    पितामहः सोऽजनि नित्यतृप्तः।
सदा तदास्वादकरः समुक्ता-
    हारोऽम्ब केनाप तथाभिधानम्॥ १३१ ॥

कल्याणि भावत्क कुचाग्रजाग्र-
    त्प्रत्यग्रहार स्फुटमौक्तिकानि।
प्रायः सुमेरुं परितश्चरन्ति
    पटून्युडीनीव परिस्फुरन्ति॥ १३२ ॥

स्तनयोरनयोस्तवाम्बुराशे-
    स्तनये दीव्यति दिव्यहारयष्टिः।
परितः पृथुलारविन्दकोशं
    प्रचलन्ती कलहंसमालिकेव॥ १३३ ॥

मदनोपवने मदम्भ देहे
    तव बाहे कृतवल्लिका विमोहे।
नव पल्लव पुल्लपुष्प भूयं
    यदुपर्यङ्गुलयो नखाश्च यान्ति॥ १३४ ॥

अम्भोजबन्धुरयमम्बुरुहान् दवीयान्
    तत्सन्निधिं जिगमिषुस्तनये पयोधेः।
अम्भोजमम्ब तव हस्ततयाऽवतीर्णं
    सौवर्णकङ्कणमिषान्निकषा समिन्धे॥ १३५ ॥

आम्रेडित त्वत्कर पद्मरागः
    अत्युज्ज्वलैः कङ्कणपद्मरागैः।
लीलाशुको दाडिमबीजलुब्धो
    विश्वम्भरप्रेयसि विप्रलब्धः॥ १३६ ॥

कृताञ्चनौ काञ्चन कङ्कणस्थ-
सङ्क्रन्दनग्रावमहस्तरङ्गैः।
कल्याणि पाणी कनतस्तरां ते
शैवालमालाभिरिवारविन्दे॥ १३७॥

इन्धे तावकपाणिशोणिमभरः कल्याणि नैसर्गिकः
पद्मो कङ्कणपद्मरागकिरण श्रेणीभिराप्यायितः।
तत्संरूढबिडाललोचन सुहृद्वैदूर्यवीक्षाभयाद्-
गच्छद्विभ्रमकीरवारणघना यासेन चाम्रेडितः॥ १३८॥

काञ्चीकवीन्द्रकवनादपि कोमलं ते
कल्याणि पाणितलमम्बुजनाभकान्ते।
अश्रान्तमर्थिषु बहुष्वभितन्यमान-
दानश्रमादरुणिमानमुपैति नूनम्॥ १३९॥

न केवलं नागनगेशकान्ते
हस्तो ननु स्वर्णगतोऽधिकस्ते।
यं संप्रदानीकुरुते स निःस्वं
सोऽपि क्षितौ स्वर्णगतोऽधिकः स्यात्॥ १४०॥

असावनष्टापदमर्थिनं द्राक्
अष्टापदावासमहो विधाय।
आपत्कथादूरगमब्धिकन्ये
करोति कल्याणि करस्त्वदीयः॥ १४१॥

दीना दानैस्त्वत्कराब्जादुपात्तैः
देवि स्थाने स्वर्णवत्त्वं प्रपन्नाः।
आसन्नेते सिन्धुकन्ये नदीनाः
चित्रं नित्यं भान्ति लक्ष्मीकुमाराः॥ १४२॥

कनत्कनककङ्कणोल्बणमणीघृणि श्रेणिका-
महासरिदुदञ्चितं मकरमत्स्यरेखावृतम्।

www.prapatti.com

प्रसह्य मधुनाशनं कृतवतैव कृष्णेन ते
करम्बुरुहमिन्दिरे कलितपीडनं राजते॥ १४३॥

स्वर्णस्फुरद्बहुविधोर्मिकमब्धिकन्ये
रत्नाकरं तव करं निगदन्ति सन्तः।
आक्रान्तसर्वभुवनो हि जनार्दनोऽसौ
दुर्धर्षतां व्रजति यस्य परिग्रहेण॥ १४४॥

पालकं सुमनसां तव स्थिर-
च्छायमब्धितनये समाश्रये।
पञ्चशाखमिह भव्यकल्पकं
दानवारिपद पोषणक्षमम्॥ १४५॥

जननि मरकतादिः सार्द्धमारक्तरत्नैः
विधुमुखि निहितस्ते व्यर्थमेवोर्मिकासु।
प्रसृमरकरदीधित्यङ्कुरैरङ्गुलीनां
परिभजति यतोऽसौ पद्मरागाविशेषम्॥ १४६॥

रागं रमे तव शुभाङ्गुलिसङ्गलब्धं
वीटी मुरान्तकमुखे प्रकटीकरोति।
मुक्तासवर्णनवचूर्णगनागवल्ली
पर्णात्मना न खलु रागकथान्यथाऽस्याः॥ १४७॥

भवान्धकूपे पतिताय मह्यं
दुर्मोचकर्मोत्कर कर्कशाय।
करावलम्बं कमले ददासि
तदञ्चलं ते तत एव रक्तम्॥ १४८॥

दधति नखास्तवाम्ब तनुहेमलताभभुजा-
रुचिरकरारविन्दचलदङ्गुलिकोटिजुषः।
सरयसरस्वती झरसमापतनोपनत-
ह्रदतनुवीचिकाञ्चल समुज्ज्वलफेनतुलाम्॥ १४९॥

समाननामा स विधुः समानशे
    दशेह भावानिति मातरीर्ष्यया।
प्रशस्तयोस्तावकहस्तयोर्विधुः
    दशावतारान् विदधे नखात्मना॥ १५० ॥

विभाति वाराशिवरेण्यकन्या
    प्रशस्तहस्तोल्लसितो नखात्मा।
विधुर्विचित्रागम एव नूनं
    नाऽसौ तुलामेति यतः पदाऽपि॥ १५१ ॥

क्षत्रं तदेव कथयन्ति बुधाः क्षतेभ्यो
    यत्त्रायते यदुपतेर्दयिते ततोऽहम्।
यत्प्रत्युत क्षतशतं तनुते प्रियाङ्गे
    नक्षत्रमेव तदवैमि नखं त्वदीयम्॥ १५२ ॥

पाथोजाक्षभुजान्तरालवसतेः पद्मालयायाश्चिरं
    पाण्योर्दक्षिणवामयोः स्थितिमती पद्मे दिशेतां श्रियम्।
यत्रैकं हरिदृश्ययोर्मुकुलितं खेदाददाक्षिण्यवत्
    योगोत्थाद् ध्रुवमन्यदेति हसितं दाक्षिण्यशाल्याश्रयात्॥ १५३ ॥

रोमालिं द्रागुद्गतां नाभिरन्ध्राद्
    व्यालीं विद्मः पद्मगेहे भवत्याः।
गाढोरोजस्मेर हाराग्रजाग्रत्
    रत्नं नूनं तच्छिरस्यं प्रतीमः॥ १५४ ॥

शौरेः सुरात्मनोऽक्ष्णः समजनि यमुनेत्युद्गतेर्ष्येव गङ्गा
    जाताङ्घ्रौ तस्य गौणी किल तदपि तवापत्यतेऽन्यत्र निन्दाम्।
तस्याः कर्तुं तवासौ किमभवदुदरे भानुजा रोमराजी-
    व्याजाद्विश्वाम्ब पत्न्या विदुरुदरभवं मुख्यवृत्त्या ह्यपत्यम्॥ १५५ ॥

जेतुं कंसारिमाराद्व्यवसितमधिकामाजि सङ्घस्तनक्ष्मा-
    भृद्भ्यामभ्याशदेशे तव जयति तयो रोममरेखा शतघ्नी।

दत्ते नाभी रमे सज्जघनधरणिभृन्मण्डले यन्मुखोद्यत्
तप्तायः पिण्डपातस्थलनियम कृते क्लृप्तगर्तप्रतीतिम्॥ १५६ ॥

अभ्युद्गताधर रस ग्रहणाय रोम-
रेखाषडङ्घ्रितितिरम्ब पथि प्ररूढम्।
उत्तुङ्गसङ्गतमुरोजगिरीन्द्रयुग्मम्
उल्लङ्घितं चिरमुपायमुदीक्षते किम्॥ १५७ ॥

रत्नावली तव रमे वरमेखलायाम्
अङ्गारपङ्क्तिरविदूरगता तु तस्याः।
रोमावली तदुपजातविशीर्णमूल-
धूमाकृतिं वहति शक्रमणीव नीला॥ १५८ ॥

निःश्रेणिका नाथदृशोरुरोज-
दुर्गाधिरोहे तव रोमरेखा।
लावण्यलक्ष्मी वरवेणिका वा
रतीशभूपाल कृपाणिका वा॥ १५९ ॥

स त्वद्गर्भसमुद्भवोऽप्ययुतशुक्सन्दायकैः सायकैः
पञ्चेषुः पितरञ्च वञ्चयति तत्पञ्चायुधं माधवम्।
लग्ना नूनमतो जगज्जननि ते रोमावलिच्छद्मना
तातद्रोहिसुतप्रसूत्युपनता दुष्कीर्तिरेवोदरे॥ १६० ॥

रज्जुं रोमालिरूपां गुरुकुचकलशालम्बिनीं जीवनार्थी
प्रातस्त्वन्नाभिवापीपरिसरमनयन्मन्मथो जाततृष्णः।
दृष्ट्वा तामत्यगाधामिह न पुनरलं दैर्घ्यमस्या इति श्रीः
तामौज्झत्तत्र रज्जुं न तृष उपरतिः शम्बरध्वंसिनः स्यात्॥ १६१ ॥

ऋत्विग्रमे रतिमखे ननु यौवनात्मा
नाभीबिलावटयुतोदरवेदिकायाम्।
यूपं तनोति तव रोमलतास्वरूपं
शङ्केऽस्य सङ्गतमुरोजयुगं चषालम्॥ १६२ ॥



www.prapatti.com

रतीशमातस्तव रोमवल्लिका-
    मयी मनोज्ञा यमुना पुनातु माम्।
वलित्रयं यत्र तरङ्गविभ्रमं
    बिभर्ति हारांशुचयश्च फेनताम्॥ १६३ ॥

स्तनाद्रिभाजि स्थिरहारशोभा-
    सुधाम्बुधौ रोमलता मुरारेः।
वटच्छदः स्यादुदरं तवाम्ब
    वलित्रयं चित्रमिहोपधानम्॥ १६४ ॥

नाभीसरोरोधसि नालिकेर-
    द्रुमभ्रमं रोमलता ददाति।
तदग्रलग्नौ तनुतस्तव श्रीः
    स्तनौ पुनस्तत्फलयुग्मशङ्काम्॥ १६५ ॥

नाभीसरश्चिरमगाधतरं विधाय
    नारायणप्रणयिनि श्रमिणा विधात्रा।
रोमावली तव विभाति तटे तदीये
    क्षिप्तेव तत्खननहेतुरियः शलाका॥ १६६ ॥

सरितो गिरितोऽवतीर्य निम्नं
    प्रविशन्त्यम्ब तवात्र नाभिगर्तात्।
तनुरोमलता कलिन्दजाऽहो
    स्तनशैलान्तिकमारुरुक्षतीव॥ १६७ ॥

दायादः पितुरेष नाभिकमले दामोदरस्यैधते
    धातेत्येवमसूययेव जननि प्रेप्सुस्ततोऽप्युच्छ्रयम्।
नाभीकूपसमुत्थरोमलतिका नालाग्रजाताद्भुत-
    स्फारोरोज सरोज कोशयुगमध्यास्ते सुतस्ते स्मरः॥ १६८ ॥

जगत्त्रयी चेतन जन्महेतौ
    वलित्रयी भाति तवोदरेऽस्मिन्।

नारायणप्रेयसि नाभिकूप-
    निपानसोपानपरम्परेव॥ १६९ ॥

जित्वा जगन्ति विशिखैर्जगदम्ब जैत्र-
    स्तम्भं तवाङ्गभुवि रोमलताच्छलेन।
मिन्वन् मनोजनृपतिर्जितलोकसङ्ख्यां
    मूले किमस्य तिसृभिर्व्यलिखद्वलीभिः॥ १७० ॥

स्नातस्य नाभिसरसि ध्रुवमब्धिकन्ये
    सञ्जग्मुषो रतिपतिव्रतिनः समाधिम्।
आषाढमेव कलये तव रोमराजिम्
    अस्या वलित्रितयमस्य च दर्भकूर्चम्॥ १७१ ॥

नाभीवापीसविधभुवि ते यौवनारामवृद्ध्यै
    न्यस्तं रोमावलिमय घटीयन्त्रदारु स्मरेण।
मूले तस्य स्फुरति रचितं पादविन्यासहेतोः
    सोपानानां त्रितयमुदधेः पुत्रि वल्यात्मना किम्॥ १७२ ॥

दीर्घं नाभीविवरसरसो देवि गम्भीरिमाणं
    स्पष्टं द्रष्टुं वृषगिरिपतेरक्षमावक्षमीनौ।
गाम्भीर्यैकास्पदमपि रसैः पूरितं मानसं यत्
    तस्य स्वैरं पतति जलधेः पुत्रि तत्रैव नित्यम्॥ १७३ ॥

आश्रित्य सज्जघन हस्तिगिरिस्थितायां
    पञ्चायुधो भृशमुदञ्चति देवि काञ्च्याम्।
नाभीमनन्तसरसीं कमले खगेन्द्र-
    स्तम्भं च रोमलतिकां वलिधिष्ण्यभाजम्॥ १७४ ॥

जघनपुलिनवत्यां केशशैवालभाजि
    त्रियुगनयनमीनैस्तृष्णया सेवितायाम्।
त्वयि रसभरितायां दिव्य सौन्दर्यसिन्धौ
    नलिनमुखि विधत्ते नाभिरावर्तशोभाम्॥ १७५ ॥

त्वन्मध्ययष्टिं परिवेष्ट्य शेते
 नाभीबिलान्ते रशनापृदाकुः।
असावपूर्वः कमले यदीया-
 न्यङ्गानि सर्वाणि च रत्नवन्ति॥ १७६ ॥

मध्यात्मना जननि शब्दगुणेन योगात्
 जग्राह शब्दमतुलं रशनागुणस्ते।
शौरेश्श्रवो वियति सौति सुखं स शब्दैः
 तुष्ट्यै विशिष्य किल शिष्यगिरो गुरोः स्युः॥ १७७ ॥

रतितन्त्ररहस्यमम्ब शब्दै-
 रमणीयैर्विशदं प्रकाशयन्ती।
रसनैव रतिप्रियस्य नूनं
 रशनाऽसाविति लेखकप्रमादः॥ १७८ ॥

उपाश्रिता मध्यममब्धिकन्यके
 निजप्रभाभिः शमितोत्तमस्थितिः।
असौ कृतश्रीमदनादरा रमे
 न मेखला न प्रतिभाति मे खला॥ १७९ ॥

यदनन्तपाणिनिहितं सुमध्यमे
 वलते सुवर्णमयसूत्रमम्ब ते।
गुणवृद्धिमान् प्रकृतिशोभनोऽमुना
 नियतं सुशब्दनिचयोऽभिधीयते॥ १८० ॥

श्रुतिमञ्जुनादनिचयैरभिरामा
 सवलग्ननाभिजघनद्युतिहेतुः।
विलसत्यनन्तसरसाक्षियुगाय
 स्वदते मुकुन्ददयिते तव काञ्ची॥ १८१ ॥

काञ्चीं मुक्तिक्षेत्रमाहुर्जगत्यां
 इन्धे चित्रा तावकी देवि काञ्ची।

अप्यार्याणां योगिनां मुक्तिहेतोः
चेतो यस्यां बध्यते तार्क्ष्यकेतोः॥ १८२ ॥

लब्धवासमधिकाञ्चि देवि सत्
रत्नजातमभिजातदीप्तिकृत्।
कंसहिंसनकटाक्षपात्रतां
विन्दतीति क इवात्र विस्मयः॥ १८३ ॥

अल्पादल्पं त्वद्वलग्नं च लग्नं
वासस्तस्मिन्नर्थतः शब्दतश्च।
अम्ब स्नेहादम्बरं वीक्ष्य काञ्ची-
दम्भाद् विद्युत् तत्र विद्योतते हि॥ १८४ ॥

अक्ष्यपदादणुतस्तव मध्यात्
अम्ब रमे वरमम्बरमेव।
अस्य हि वैभवमस्तविवादं
विप्रतिपन्नमनैन्द्रियकत्वम्॥ १८५ ॥

अण्वप्यदस्तव वलग्नमिवाम्ब काञ्चीम्
अप्यम्बरं स्तनभरञ्च बिभर्ति युक्तम्।
आहुर्यतो द्व्यणुककारणमप्यणुं तम्
आधारमत्र कतिचिज्जगतोऽखिलस्य॥ १८६ ॥

कार्श्यं दृष्ट्वा कमलनयने नेत्रमेकं भवत्या
दत्तं मध्यं प्रति तव पतिस्तत्र तु स्पर्धयेव।
नेत्रद्वन्द्वं रुचिरमदिशत् तद्विचित्रं त्रिनेत्रो
जातोऽप्येष प्रथयति कथं संपदं शम्बरारेः॥ १८७ ॥

पयोजनाभप्रियपत्नि विष्णु-
पदारविन्दव्यपदेशमेव।
निरीक्ष्य मध्यं नियमेन तत्र
नेत्रं मुदा त्वं निदधासि नूनम्॥ १८८ ॥

नेत्रेण नीरनिधिपुत्रि नितान्तयोगात्
मध्यं न चाक्षुषमिति क्षममेव मातः।
आसन्नताऽपि सुतरामतिदूरतेव
प्रत्यक्षतां प्रतिरुणद्धि यथाऽञ्जनादौ॥ १८९ ॥

अत्यल्पभावात् तव देवि मध्यो
हरेः कटाक्षाविषयो यतोऽभूत्।
अतुल्यकल्याणगुणाश्रयस्या-
प्यजस्रबन्धोऽस्य किलानुरूपम्॥ १९० ॥

सुराशनश्रीप्रथने निदानम्
उपेन्द्रसंतोषकृदब्धिकन्ये।
वलग्नमेतद् रुचिरोरुरम्भा-
विलग्ननेत्रं कलये बलघ्नम्॥ १९१ ॥

परमाणुषु मातरादिमं
यदिदं कोशकृदाह मध्यमम्।
अमरः किल पामरस्ततः
स बभूव स्वयमेव मध्यमः॥ १९२ ॥

अधिकाञ्चि तथाभिवृद्धिमत्या-
प्यभिजातः श्रुतिमञ्जुशब्द पङ्क्त्या।
अतिभङ्गुर एव शून्यवादं
न जहौ माध्यमिकक्रमस्त्वदीयः॥ १९३ ॥

जननि स्मृतिजन्ममूलभूतं
तनु मध्यं तव सन्ततानुमेयम्।
तदिहोपनतं पुरस्तनाङ्गी-
कृतसद्गौरवदर्शनानुरोधात्॥ १९४ ॥

न परं तव रम्यसीधुमित्रं
वचनं पञ्चमभूतमब्धिकन्ये।

अपि तु स्फुटमेखलाकलाप-
    प्रसरच्छब्दगुणोज्ज्वलं वलग्नम्॥ १९५॥

प्रबुद्धदीप्तौ प्रबलागमं ते
    हसत्यशेषाम्ब गुरौ नितम्बे।
अन्ते वसंस्तस्य तु मध्यमोऽयं
    स्थाने समातिष्ठत शून्यवादम्॥ १९६॥

मकरध्वजराजभद्रपीठं
    पुलिनं भूषणकान्तिरत्नसिन्धोः।
जलजायतने पृथु त्वदीयं
    जघनं यौवनहस्तिमस्तकं वा॥ १९७॥

कामाङ्कुशेन कलितक्षतमच्युतेन
    पाथोधिपुत्रि पृथुलं जघनं भवत्याः।
हस्तीन्द्रमस्तकमपूर्वमिदं यदस्याः
    हस्तावुभौ लसत ऊरुमिषादधस्तात्॥ १९८॥

करस्थीकर्तुं यां भगवति तवोरुश्रियमसौ
    करी नित्यं काङ्क्षत्यभिलषति तामेव कदली।
अतस्तामीर्ष्यातः प्रसभमभिमथ्नाति कलभो
    द्वयोरेकत्रेच्छा जनयति मिथो द्वेषमधिकम्॥ १९९॥

प्रकाशयत्पद्मगृहे मदावहा
    हरेरनेकाकृति नेत्र सम्पदः।
शुभोरुरम्भाद्वयशोभितं दिवं
    जयत्युदारं जघनस्थलं तव॥ २००॥

प्रकृतिः समदर्शिनी मृदूनां
    नितरामुन्नतिभाजि नीचके च।
प्रथते समता यतस्त्वदूर्वोः
    करभे देवि वरे च कुञ्जराणाम्॥ २०१॥

करभः कलभः प्रशस्तहस्तः
कदली चाप्युरवः स्युरम्ब कान्त्या।
ननु तत्र च मुख्यवर्णदैर्घ्यात्
कथयन्त्यूरुपदं त्वदीयसक्थ्नोः॥ २०२॥

तवोरुलक्ष्मीं द्विरदाः करस्थां
कर्तुं कृताशा मधुपाय मत्ताः।
दिशन्ति दानं तदभीष्टसिद्धिं
नापन्नपात्रार्पणतो हि नार्थः॥ २०३॥

असावसारोऽन्तरतीव कर्कशो
मलीमसश्चोपरि कौञ्जरः करः।
इति त्वदूरू हसतो हरिप्रिये
करिण्यपास्ते करभस्तु दूरतः॥ २०४॥

विबुधास्तव वर्णयन्ति जङ्घे
शरधी दाशरथिप्रिये स्मरस्य।
न वयं बहुमन्महे तदेतत्
न हि पृष्ठीकुरुते मनोभवस्ते ॥ २०५॥

प्रमिलन्तु शतानि काहलानां
शरधीनां समुदेतु वा सहस्रम्।
कमले तव जङ्घयोस्ततः किं
शतमन्धाः किमवेक्षितुं क्षमन्ते॥ २०६॥

काहलः कमल मन्दिरे भवत्
जङ्घयोः श्रियमचूचुरद् यतः।
तन्यते बहुमुखप्रभञ्जन-
क्षोभितेन निनदस्ततोऽमुना॥ २०७॥

तनोति सिन्धोस्तनये मनोज-
तूणीरशङ्कां तव देवि जङ्घा।



www.prapatti.com

तद्घ्राणभूतं कमलं तदग्रे
    पादापदेशेन यदाविरस्ति॥ २०८ ॥

वृन्देन वृन्दारकसुन्दरीणां
    नन्देष्टसूनोः सखि वन्दनीये।
मन्देतरानन्दथुमूलकन्दे
    वन्दे भवत्याश्चरणारविन्दे॥ २०९ ॥

यौ यस्य पादौ यदुवर्यभार्ये
    तस्यैव दृष्टौ गतिदायिनौ तौ।
चित्रं तदेतच्चरणौ तवेमौ
    गजेन्द्रयोग्यां दिशतो गतिं नः॥ २१० ॥

नलिनायतने मृदु प्रवालं
    पदयोस्तावकयोर्लवं प्रतीमः।
अत एष बिभर्ति पल्लवाख्यां
    भजते पादपशब्दमस्य पाता॥ २११ ॥

पदयोर्द्वितयं ननु त्वदीयं
    भजति स्वामिनि बालमित्ररागम्।
अथ पल्लवरूपमश्नुते तत्
    प्रतिषेधन्ति हि बालसख्यमार्याः॥ २१२ ॥

यद्वस्तु यद्गुणवता कलितानुषङ्गं
    तत्तद्गुणीति विदितं तव पादपद्मे।
अत्यन्तरागिणि कृतं हृदयं मुनीनां
    वैराग्यमम्ब भजतीति विचित्रमेतत्॥ २१३ ॥

पादान् सहस्रमपि बालसरोजबन्धोः
    पादद्वयी जयति ते जगदम्ब दीप्त्या।
बंहीयसामपि न सद्वसुहारकाणां
    प्रायो जयः कुवलयार्तिकृतां कृतः स्यात्॥ २१४ ॥

नवप्रवालादपि कोमलं ते
    न वन्दते कश्चरणारविन्दम्।
शनैरनैषीद् दृषदे यदम्ब
    स्पृशन् सशङ्कं भगवान् विवाहे॥ २१५॥

शुभतरलाक्षमञ्ज सुषमायतनं जगतां
    जननि शुचिद्विजैः श्रितमिदं पदमास्यमपि।
परमियती भिदा प्रथममभ्युदयं दधता
    त्वहिमरुचा समं हिमरुचा चरमं च रमे॥ २१६॥

प्रद्वेष्टि यः पादरुचिं तवाऽग्र्यां
    तमिन्दिरे द्रष्टुमयोग्यमाहुः।
दृष्टान्तमत्र प्रतिषिद्धदृष्टिम्
    उद्यन्तमादित्यमुदाहरामः॥ २१७॥

न वर्णतः केवलमीप्सितार्थ-
    दानादपि त्वच्चरणौ सुरागौ।
श्रियैव नोदञ्चित पद्मजाता-
    विमौ जतत्पूज्यतयाऽपि मातः॥ २१८॥

अजेन्द्रभर्गादिसुरव्रजेडिते
    भजे तव क्षीरधिजे पदाम्बुजे।
व्यनक्ति सक्तं यदलक्तकं हरेः
    उरस्तटे तस्य परत्वमुच्चकैः॥ २१९॥

उदारसन्देहमुषं वितन्वती
    मुदा रसं देहभृतां चिदात्मकम्।
सदारविन्देव्युदयन्तमिन्दिरे
    पदारविन्दे हसतः श्रिया तव॥ २२०॥

अपि नीरजस्फुरणहार्यहो रजः
    स्फुरणापहारि पदयोर्द्वयं तव।

www.prapatti.com

अपि हंसकप्रणयि धूतहंसकं
    गमनेन पद्मभवने विशोभते॥ २२१ ॥

कौचिदङ्घ्रिकमले तवाश्रितौ
    कंसहिंसनपुरन्ध्रि हंसकौ।
मञ्जुलैरखिलरञ्जकौ रुतैः
    मानसे विहरतो मधुद्विपः॥ २२२ ॥

राजच्छोभनखाश्रितं शुभकरं राजीवराजीसुहृत्
    पद्मे गाढतमोहरं तव पदं बालार्कबिम्बं च तत्।
यद्यप्यम्ब समं तथापि विदितो भेदस्त्वियानेतयोः
    अर्घ्यं संस्कृतमुत्तरस्य कलयन्त्याद्यस्य पाद्यं बुधाः॥ २२३ ॥

तव भगवति वन्दे दिव्यपादारविन्दे
    सदसि यदभिषेकं शम्भुजम्भारिमुख्याः।
स्वमुकुट घटितस्वः शाखिनिष्पन्नपुष्प-
    प्रसृमरमकरन्दैरन्वहं तन्वते ते॥ २२४ ॥

प्रणतिषु तव पुण्यद्वन्द्वमासीत् पुरारेः
    प्रणिपतनत एकं लोकमातस्त्वदङ्घ्र्योः।
चिरविरहकृशस्य स्वावतंसामृतांशोः
    तव नखमयतारायोजनेन द्वितीयम्॥ २२५ ॥

चरणनलिनयुग्मं संसृतिक्लेशसिन्धोः
    तव हरिसखि सन्तस्तारकं सङ्गिरन्ते।
इदमुचितमवैमो येन तत्संश्रितानां
    ततिरपि च नखानां तारकत्वं दधाति॥ २२६ ॥

अनिशं प्रकाशमधिगन्तुमिच्छया
    तव भाति सिन्धुतनये पदाम्बुजम्।
अधिगम्य नूनमभवन् यतो नखा-
    न्यत एव खं च तदभून्नभस्थलम्॥ २२७ ॥

मरालिकेड्याऽप्यमरालिकेड्या
सुरद्रुमश्रीरपि विद्रुमश्रीः।
खरांशुकान्ता नखरांशुकान्ता-
प्यम्ब द्वयीयं तव चित्रमङ्घ्र्योः॥ २२८ ॥

चरणाविमौ हि करुणानिधे यतः
तरुणारुणग्रकिरणानुकारिणौ।
अनुविन्दतस्तदरविन्दबन्धुतां
अपि साधुचक्रबहुमान्यतां रमे॥ २२९ ॥

पदमाश्रितस्तव पयोधिकन्यके
विपदं न जातु भजतीति साम्प्रतम्।
अपि तत्परागमधिमौलि धारयन्
अपरागतां व्रजति जन्तुरद्भुतम्॥ २३० ॥

श्रितः परागं जरठः शशाङ्को
दृष्टे नतत्र्यम्बकशीर्षगश्रीः।
स्पृशन्नपि त्वत्पदयोः परागं
न जातु तारुण्यमहो जहाति॥ २३१ ॥

सुरादिमान्यं विधुतोपसर्गं
शुभावहं ते मृदु चारुवर्णम्।
पदं रमे यः प्रणमेज्जपेद्वा
दूरादपास्यत्परमापदं सः॥ २३२ ॥

पादं त्रपादं तव पङ्कजानां
वन्दे भवं देवि तरीतुकामः।
मस्ते समस्तेऽपि मञ्जुलाक्षा-
रागं परागं वहते यदीयम्॥ २३३ ॥

पदद्वयं यस्तव देवि सेवते
प्रभुः श्रितानां द्विपदो भवत्यसौ।

विधुस्वसस्तद्विमुखस्तु यो नरः
चतुष्पदं हन्त वदन्ति तं बुधाः॥ २३४ ॥

पदयोस्तवाम्बरागं
प्राहुः स्वाभाविकं वयं त्वेनम्।
पुष्कलरागप्रियतम
हृदयवसत्युपनतं विजानीमः॥ २३५ ॥

परमकरावलिरम्या
बहुरागधराधरोरुविभ्रमभाक्।
असि हंसहारिगतिका
पद्मे पितृवत्पितृप्रसूवच्च॥ २३६ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे सौन्दर्यस्तबकः॥

www.prapatti.com